शूकदोषे जाते पीडितं सद्यत् संरब्धम् सशोथं भवति तल्लिङ्गं स्तब्धितमुच्यते । संमूढपिडकामाह "पाणिभ्यां शूकसंमूढे संमूढपिडका७ भवेत्" । शूकदोषे जाते पाणिभ्यां शूकसंमूढे पिषिते लिङ्गे" । अत्रापि वातकोप इत्यनुवर्त्तते । अथावमन्थमाह "दीर्घा बह्व्यश्च पिडका दीर्य्यन्ते मध्यतस्तु याः । सोऽवमन्थः८ कफासृग्भ्यां वेदना रोमहर्षकृत्" । दीर्घा दीर्घाङ्कुराः । पुष्करिकामाह "पिडका पिडकाव्याप्ता पित्तशोणितसम्भवा । पद्मकर्णिकसंस्थाना९ ज्ञेया पुष्करिकेति सा" । पिडकाव्याप्ता पार्श्वतः क्षुद्रपिडकाव्याप्ता । अतएव पद्मकर्णिकसंस्थाना । स्पर्शहानिमाह "स्पर्शहानिन्तु१० जनयेच्छोणितं शूकदूषितम्" अत्र स्पर्शासहत्वमेव लक्षणम् । उत्तमामाह "मुद्गमाषोपमा रक्ता रक्तपित्तोद्भवा च या । एषोत्तमाख्या पिडका११ शूकाजीर्णसमुद्भवा" । शतपोनकमाह "छिद्रैरणुमुखैर्लिङ्गं चितं यस्य समन्ततः । वातशोणितजो व्याधिः विज्ञेयः शतपोनकः१२" । शतपोनकस्य चालनी तत्तुल्यत्वाच्छतपोनकः । त्वक्पाकमाह "वातपित्तकृतो ज्ञेयस्त्वक्पाको१३ ज्वरदाहकृत्" । शोणितार्बुदमाह "कृष्णैः स्फोटैः सरक्ताभिः पिडकाभिर्निपीडितम् । लिङ्गं वास्तु रुजाश्चोग्रा ज्ञेयं तच्छोणितार्बुदम्१४" । वास्तुरुजः स्फोटपिडकाधिष्ठानवेदनाः । अथ मांसार्बुदमाह "मांसदुष्टं विजानीयादर्बुदं मांससम्भवम्१५" । मांसपाकमाह "शीर्य्यन्ते यस्य मांसानि यस्य सर्वाश्च वेदनाः । विद्यात्तं मांसपाकन्तु१६ सर्वदोषकृतं भिषक्" । शीर्य्यन्ते गलन्ति । सर्वाश्च वेदनाः वातपित्तकफजाः । अथ विद्रधिमाह "विद्रधिः१७ सन्निपातेन यथोक्तमभिनिर्दिशेत्" । यथोक्तं सान्निपातिकं विद्रधितुल्यं कथयेत् । तिलकालकानाह "कृष्णानि चित्राण्यथ वा शुक्लानि सविषाणि तु । पतन्ति पातयन्त्याशु मेढ्रं निरवशेषतः । कालानि भूत्वा मांसानि शीर्य्यन्ते यस्य देहिनः । सन्निपातसमुत्थांश्च तान् विद्यात्तिलकालकान्१८" । चित्राणि नानावर्णानि । शुक्लानि शुक्लवर्णानि मञ्चाः क्रोशन्तीति वत् । सविषाणि सविषशूकाख्यजन्तुविशेषकृतत्वात् । शीर्य्यन्ते गलन्ति । कृष्णतिलतुल्यत्वात्तिलकालकाः । असाध्यमाह "तत्र मांसार्बुदं यच्च मांसपाकश्च यः स्मृतः । विद्रधिश्च न सिध्यन्ति ये च स्युस्तिलकालकाः" । [२रवे च मेदि० ।

**शूकाक** पु० शूकैः जलजन्तुभेदैः कायति कै—क । १प्रावृट्काले

**शूककीट** पु० शूकाकाररोमयुक्तः कीटः शा०त० (शुयापोका) कीटभेदे अमरः । स हि शूकाभरोमवान् ।

**शूकधान्य** न० शूकयुक्तं धान्यम् शाक० । यवादौ धान्ये अमरः । "व्रीह्यादिकं यदिह शूकसमन्वितं स्यात् तत् शूकधान्यमथ मुद्गमकुष्ठकादि । शिम्बीनिगूढमिति तत् प्रवदन्ति शिम्बीधान्यं तृणोद्भवमथो तृणधान्यमन्यत् । तत्र त्रिदोषशमनं लघु शूकधान्यं तेजोबलातिशयवीर्य्यविवृद्धिदायि । देशे देशे शूकधान्येषु संख्या स्यात् शक्या नो नरैर्दैवतैर्वा" राजनि० । "शूकधान्यं शमीधान्यं समातीतं प्रशस्यते । परतो वातकृद्रूक्षं प्रायेणाभिनवं गुरु" राजवल्लभः । [शब्दच० ।

**शूकपिण्डी** स्त्री शूकस्य पिण्डीव । शूकशिम्ब्याम्

**शूकर** पुंस्त्री० शू इत्यव्यक्तं शब्दं करोति कृ—अच् शूक+अस्त्यर्थे र वा । स्वनामख्याते पशौ अमरः स्त्रियां ङीष् ।

**शूकरकन्द** पु० शूकर इव रोमशः कन्दोऽस्य । वाराहीकन्दे राजनि० ।

**शूकदंष्ट्रक** पु० गुदभ्रंशे क्षुद्ररोगभेदे "सदाहो रक्तपर्य्यन्तस्त्वक्पाकी तीव्रवेदनः । कण्डूमान् ज्वरकारी च स स्याच्छूकरदंष्ट्रकः" भावप्र० तल्लक्षणमुक्तम् ।

**शूकरपादिका** स्त्री शूकरस्येव पादाः मूलान्यस्याः कप् अत इत्त्वम् । कोलशिम्ब्यां राजनि० ।

**शूकराक्रान्ता** स्त्री शूकरेणाक्रम्यते स्म आ+क्रम—क्त ३त० । वराहक्रान्तायां शब्दच० ।

**शूकरी** स्त्री शूकर आक्रामकत्वेनास्त्यस्याः अच् गौरा० ङीष् । १वराहक्रान्तायां शब्दच० । शूकर+जातौ ङीष् । २तज्जातिस्त्रियाञ्च । [द्रव्ये त्रि० ।

**शूकरेष्ट** पु० ६त० । १कसेरुनामकन्दे राजनि० । २वराहप्रिय-

**शूकवती** स्त्री शूकस्तीक्ष्णाग्रमस्त्यस्याः मतुप् मस्य वः ङीप् । १कपिकच्छ्वां शब्दच० । २शूकयुते त्रि० स्त्रियां ङीप् ।

**शूकशिम्बा** स्त्री शूकयुक्ता शिम्बा शाक० । कपिकच्छ्वां शब्दच० ।

**शूकशिम्बि(म्बी)** पु० शूकयुक्ता शिम्बिः शाक० वा ङीप् । कपिकच्छ्वां शब्दच० ।

**शूका** स्त्री शूकोऽस्त्यस्याः अच् । कपिकच्छ्वां शब्दच० ।

**शूकापुट** पु० तृणमणिभेदे हारा० । [शब्दर० ।

**शूतिपर्ण** पु० श्वि—क्तिच् शूति स्फीतं पर्णं यस्य । आरग्वधे

**शूद्र** पुंस्त्री० शुच—रक् पृषो० चस्य दः दीर्घश्च । १चतुर्थे वर्णे स्त्रियां टाप् । शूद्रा शूद्रजातिस्त्रियाम् । पुंयोगे ङीष् । शूद्री शूद्रभार्य्यायाम् । शुचा द्रवति द्रु-ड पृषो० । २शोकदुःखकगतियुक्ते शूद्राधिकरणशब्दे दृश्यम् ।